International Journal of Sanskrit Research 2023; 9(3): 104-108

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(3): 104-108
© 2023 IJSR
www.anantaajournal.com
Received: 15-04-2023
Accepted: 20-05-2023

**Dr. Gv. Phaniraja Shastry**
Assistant Professor, S.V. Vedic University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Dr. Gv. Phaniraja Shastry**
Assistant Professor, S.V. Vedic University, Tirupati, Andhra Pradesh, India

# श्रुत्युक्तकर्मसु तत्त्वबोधः

Dr. GV Phaniraja Shastry

**सारांशः-**
सर्वत्र वैदिककर्मसु ग्रहप्रसङ्गः, प्रवर्ग्यक्रतुविचारः उपसत्, सौमिकविचारः, सोमविक्रेतृव्यवहारः, ब्रह्ममेधः, पैतृककर्मादि सहस्राधिकप्रकरणानि एकैकशः कर्माङ्गोपदेशने तत्त्वमुपदिशन्ति, साधुजीवनोत्कर्षतामावेद्य, धर्मसम्मतिमार्गे प्रयोज्य क्रमेण तस्यान्तःकरणं परिशोधयन्ति। इत्थं वैदिककर्मान्तर्गतं तत्त्वबोधमभिगच्छन् विद्वान्, यथाशक्ति वेदविहितकर्माण्याचर्यसर्वगत-ब्रह्मदर्शनमसकृदभ्यस्य, शुद्धान्तःकरणाः साधनचतुष्टयसम्पत्तिमाप्य संसारचक्रात् निवर्तितुकामो भवति। एवं रूपमत्र श्रुत्युक्तकर्मसु भावाभिव्यक्तिप्रकाराः, कर्मफलप्रयोजयिता, ईश्वरार्पणम्, सर्वगतब्रह्मदर्शनाभ्यासः, विहितकर्माचरणं तत्वबोधश्च प्रतिपादयितुं उद्युक्तः।

**प्राक्कथनम्-**
सुविदितमेवैतत् बुधजनैः यत् कृत्स्नां मानवजातिं श्रेयः प्रापयितुं ब्रह्मणो निर्गतो ज्ञानपुञ्जो वेदो इत्याख्यायत इति। समेषामास्तिकानामनिष्टविनाशनाय दुःखव्यार्तनाय इष्टार्थसाधनाय निरन्तरसुखजीवनोद्भावनाय च प्रकाममलौकिकानुपायान् वेदयत्ययं वेदः। ततोधिकं संसारचक्रस्य षड्भावविकारनिवृत्तिपूर्वकं पुनरावृत्तिरहितनिरतिशयसुखास्पद-ब्राह्मीस्थिति-साधनाभूतान् पथश्च सन्दर्शयति वेदः। एवं ऐहिकसुखप्रापणाय स्वर्गादिपरलोकसाधनाय चोपायान् बोधयित्वा आत्यन्तिकसुखं ब्रह्मानन्दात्मकम् अधिगन्तुं पथदर्शिका वर्तते श्रुतिः।
द्वैविध्यं भजते स च वेदः कर्मकाण्डः ज्ञानकाण्डश्चेति। इहलोके – परलोके च सुखप्रापकानि दुःखनिर्मूलकानि वेदोक्तानि कर्माणि कर्मकाण्डनाम्ना सुप्रथितानि। ज्ञानकाण्डस्तु संसारचक्रभयमुन्मूल्य शाश्वतीं परब्रह्मावाप्तिम् उपदिशद्भागः ज्ञानकाण्ड इति विख्यातः। परिमाणदृष्ट्या ज्ञानकाण्डात् कर्मकाण्डसम्बन्धिग्रन्थो वेदेऽधिकतरो विद्यते। तथा चायं कर्मकाण्डः क्रियाबाहुल्यवच्चकास्ति।
पाञ्चभौतिकदेहोपदानप्रभृति आदेहोत्सर्गं मनुष्यो यत्किञ्चदाशासान एव वर्वर्ति। ब्रह्मचर्यसमये विद्यासमुपार्जनदशायां वा गार्हस्थ्यजीवने वा मनुष्यस्य वाञ्छाः अनन्ताः अपाराश्च। तासु काश्चन धर्माविरुद्धाः भवन्ति। अवशिष्टाः प्रायेण लोभपूर्णाः भवेयुः सर्वासां वाञ्छानां परिपूर्तये, यंकमप्युपायमवगन्तुं सर्वोऽपीच्छुको भवति। लौकिकैरुपायैरनवाप्तकामनापरिपूर्त्यर्थम् अध्वानमन्विच्छद्भ्यो जनेभ्यः श्रेयस्करं मार्गमुपदिशन् विपुलो भवति वैदिककर्मकाण्डः। संसारे प्रवर्तयतीति प्रवृत्तिकर्मनाम्नाचायं कर्मकाण्डः विश्रूयते। साधारण्येन जनानां जीवने अत्यधिको भागः प्रवृत्तिकर्मभिरेव व्यापृतो विद्यत इति निःसदिग्धम्।

एवं सति कर्माचरणे समभिप्रवृत्तस्य कर्मकाण्डे गृहीताभिनिवेशस्य मनुष्यस्य संसारनिवर्तकत्वभावना (निवृत्त्यनुकूलमानसिकव्यापारः) उत स्वयं सिद्ध्यति? आहोस्वित् परप्रेरिता परोपदिष्टा भवेद्वा वैदिककर्मणां चोदकवाक्यानि तदङ्गमर्थवादादिकञ्च पौनः पुण्येन कर्तारमभिप्रवर्तयन्ति। तत एव कर्मण्यो यायाजुको भवेत् किल मनुष्यः एवं तर्हि सर्वात्मना प्रवृत्तिमार्गविरुद्धं संसारनिवर्तकपथं कथमवलम्बते मनुष्यः इत्याशङ्का।

तथैव वेदवाक्यविचारकशास्त्रं मीमांसानामकं पूर्वोत्तरभेदेन प्रवृत्ति-निवृत्त्यनुकूलानि कर्माणि व्याख्यातृभिः द्विधा दरीदृश्येते। तत्प्रणेतारौ जैमिनिव्यासाभिधानौ महर्षी स्वीयमतानुकूलसूत्राणि मिथो विरोधाभासानि कथयामासतुः। इत्थं परस्परविभिन्नयोः कर्मकाण्ड-ज्ञानकाण्डयोरपरिहार्या वा विरुद्धार्थता । विद्येत वा अवकाशः साध्यसाधनभावस्य उत? मानसिकव्यापारमात्रसापेक्षं ब्रह्मज्ञानमेव साधनम्? अथवा गुणक्रियाद्रव्यसापेक्षं कर्मैव ज्ञानावाप्तेः साधनम्? नाद्यः कारणव्यतिरेकेण कार्यस्य असद्भावो विख्यात एव अतः साधनान्तरानपेक्षं ब्रह्मज्ञानं कर्मकारणं न भवितुमर्हति। नापि द्वितीयः। कारणान्तरानपेक्षस्य ब्रह्मज्ञानस्य कर्म कदाचिदपि हेतुर्नभवतीति आचार्यैविनिश्चितम्।

एवं तर्हि कर्मज्ञानकाण्डयोः सम्बन्धः सर्वात्मना निरस्तो वा? कर्मणो ज्ञानावाप्तेः साक्षात् साधकत्वम्। यद्यपि वेदान्तशास्त्रप्रवर्तकैः निराक्रियते। तथापि कर्माचरण-फलकचित्तशुद्धिसम्पादनद्वारा परम्परासाधनाभूतत्वं शिष्टैर्नप्रत्याख्यायते। "चित्तसंशुद्धये कर्म न तु वस्तूपलब्धये" इत्यपि शिष्टवचः। तर्हि परम्परया अपि कर्मसु निवर्तकत्वभावः कुत्रचिदपि वर्तेत खलु न चेदाजीवनं कर्मण्याचरताजनेन झटित्यहेतुकज्ञानेप्सा कथम् उद्बुध्येत? निवृत्तिमार्गसंसेव्यः इति परप्रचोदनेनापि कथं निश्चिन्वीत? सोऽयं निवर्तकत्वाभावोद्भासकः तत्त्वबोधः वैदिककर्मसु बहुधा अनेकधा अभिव्यज्यत इति परिशोधनपूर्वकं निरूपणे सम्प्रवृत्त एष प्रबन्धः।

## भावाभिव्यक्तिप्रकारा

भावव्यञ्जनाय तिस्रः फक्किकाः साहित्यशास्त्रे प्रसिद्धाः। वाच्योक्तिः व्यङ्ग्योक्तिः(वक्रोक्तिः) ध्वनिश्चेति। तिस्रोऽपि यथोचितं कवीश्वरैः काव्यनाटकप्रबन्धेषु हृदयङ्गमं प्रयुक्ताः [1] आनन्दवर्धनजगन्नाथ विपश्चिद्भिः ध्वन्यादि भावव्यक्तीकरणपद्धतयः स्वीयग्रन्थेषु युक्तिपूर्वकमुपनिबद्धाः। परं तु एतत् प्रसङ्गस्य मातृका वेदग्रन्थेष्वेव वर्तत इत्यवश्यं स्मर्तव्यम्।

वेदग्रन्थेषु उत्पत्तिवाक्यविधाने चोदकवाक्येषु तदङ्गविधाने च वाच्योक्तिरुपयुज्यते परं तु वाच्योक्त्यपेक्षया इतरे व्यङ्ग्योक्ति-ध्वनिफक्किके वैदिककर्मोपदेशे तत्त्वबोधनाय भूयोभूय उपयुयुजिरे। वाच्योक्तिः श्रोतरि अथवा कर्तरि कञ्चित् प्रभावं जनयति। किन्तु व्यङ्गोक्तिः, ततोऽधिकं ध्वनिश्च विचारहेतुकौ तत्त्वावधारणजिज्ञासा प्रयोजयतः। तस्मादेव इति कर्तव्यता विधानेन उत्पत्तिवाक्यविधाने चावलम्बिता वाच्योक्तिफक्किका, कर्मप्रसङ्गान्तर्गततत्त्वबोधनावसरे विरलं प्रयुक्ता सति व्यङ्ग्योक्तिध्वन्योरवकाशं प्रकल्पितवती। व्यङ्ग्योक्तिध्वनी कर्माचरणात् प्राक् तदनन्तरमपि कर्तरि विचारणां प्रयोजयतः। इतोप्यधिकं करणीयं वर्तते वा? पुनः पुनरिदमेव कर्तव्यं वा? कदा अस्य फलमनुभविष्यामि? फलावाप्तिमनुकर्माचरणं, तदनु फलाकांक्षा कुत इयं परम्परा सम्प्रवृत्ता। आश्चर्यकरशृङ्खलाबद्धो ननु भवामि। कथमनया परिमुक्तो भूयासम् इत्यादि जिज्ञासां प्रचोद्य कर्मोपदेशान्तर्गततत्त्वबोधकध्वनिः संसार-निवर्तकदशायां यजमानं प्रस्थापयति।

व्यङ्ग्योक्तिध्वनिप्रकारयोः प्रयुक्तौ हेत्वन्तरमेवं भाति। देवानां परोक्षप्रियत्वं श्रुतिसिद्धमेव हि। "[2]परोक्षप्रिया इव हि देवाः" इति श्रुतिः अधुना प्रत्यक्षपरोक्षपदे विचारयामः। अक्षिणी प्रति प्रत्यक्षमिति विग्रहः। अक्ष्णोरभिमुखं भवतीति स्पष्टार्थः। एवम् अक्ष्णोः परं परोक्षमिति विग्रहे अक्षिभ्यां व्यवहितमित्यर्थः फलति। अव्ययीभावसमासे समासान्तप्रत्ययस्टच् उभयत्र विधीयते। वस्तुतः अक्षिशब्दस्त्विन्द्रियाणाम् उपलक्षणम्। सर्वेन्द्रियाणां नयनं प्रधानमिति किलोच्यते बुधैः। अत एव श्रूयमाणं सङ्गीतादि ध्वनयः स्पर्शद्वारेणानुभूयमाना मृदुशय्यादयः, घ्राणेन्द्रियाघ्रातानि सुरभिलपुष्पादीनि, रसनयावलीढानि फलादीनि च प्रत्यक्षज्ञानगम्यान्येव भवन्ति।

देवाः प्रत्यक्षतापेक्षया पारोक्ष्यं प्रीणन्तीति श्रुत्या ज्ञायते। अत एव देवानां दर्शनेन व्यवहितोपि जनः परोक्षं तेषाम् अनुग्रहपात्रं भवति। परम्ब्रह्म व्यवहारस्तु किञ्चिदेतस्मात् भिद्यते। प्रत्यक्षभिन्नं परोक्षं परोक्षभिन्नप्रत्यक्षमिति सामान्यनियमः। अर्थात् अक्ष्णोः व्यवहितमव्यवहितं वस्तु भवतीति। परम्ब्रह्म तु नापि प्रत्यक्षम् इन्द्रियातीतत्वात्। नैव परोक्षं सर्वानुभूतियोग्यत्वात्। ब्रह्म यद्यपि इन्द्रिययोगाभावात् इन्द्रियाभिमुख्यव्यवहारातीतम्। मनः प्रधानेन्द्रियव्यवहितमपि नास्ति। अतो ब्रह्मानुभूतिः अपरोक्षेत्याख्यायते। एवमेव मनः पथादिगो ब्रह्मगतविचारोपि दैविकत्वात् श्रवणमात्रेण परोक्ष इत्येवाभाति। तथापि विचारणेन

[1] ध्वन्यालोकः

[2] तै.ब्रा.2-3-47

तदभिव्यक्तध्वनिजन्यज्ञानेन, मनने च अव्यवहितस्तद्विचारः अपरोक्षो भवति।

**कर्मफलप्रयोजयिता**

कर्त्रा कृतं व्ययप्रयाससाध्यं कर्म दृष्टप्रयोजनवत् भवति। लौकिकविषये तु कदाचित् कृतं कर्म निष्फलमपि भवति। एवञ्च वेदोक्तमलौकिकोपायप्रयुक्तं कर्मापि नश्वरमेव। एकस्मिन् दिने एकस्यां घटिकायां विघटिकायां वा कृतं अपरस्मिन् मुहूर्ते नश्यति। णश अदर्शने वय्याकरणमर्यादामनुसृत्य नश्यतीत्युक्तौ न दृश्यते इत्यभिप्रायः। कर्मापि न दृश्यते। कर्म फलञ्च प्रायेण लुप्तमिव न दृश्यते। अर्थात् फलप्राप्तिः सहसा न सिद्ध्यति। वेदवाक्यप्रचोदितेश्वलौकिकविषयकर्मसु तावत् द्वेधा विभाति। फलानुभवव्यवस्था ऐहिकः प्रथमः प्रज्ञा पशु रयिकामप्रधानानां कर्मणां क्वचित् क्वचित् स्वीयप्रारब्धकर्मानुरूपं फलं सद्यो वा बहोः कालादनन्तरं वा लभ्येत इति निर्णयः। अयमर्थो जीवति यजमाने सदेहं प्राप्यमानः इति मन्तव्यः। द्वितीयः फलानुभवः पारलौकिकः देहावसाने सम्भावनीयः यथा स्वर्गादिलोकप्राप्तिः नक्षत्रमण्डलादिज्योतीरुपपत्तिः। उभयत्रापि कर्मसमाप्त्युत्तरफल प्राप्तिः दुःशका। तर्हि कर्मफलप्रदाता यः कश्चन प्रयोजको भवेत्। तस्य नियामकव्यवस्था कीदृशी? इत्थं विरजिज्ञासोः कर्तुर्मनसि अस्मत्कृतकर्मफलप्रदाता ईश्वरनामकः परमपुरुषो वर्तते इति प्रकल्प्य कर्माचरणकाले तदनन्तरमपि ईश्वरप्रणिधानात्मकं विधेयभावं प्रचोदयति। कर्मविध्यन्तर्गततत्त्वबोधः।

**ईश्वरार्पणम्**

याज्ञिकसमाख्या च कर्मकर्तुः फलभोक्तृत्ववाञ्छां विहापयन्ती, आचरितकर्मफलं परमेश्वरार्पणमस्त्विति वाचयति। अत्र उत्पद्यते पुनर्विचिकित्सा। इयं तं प्रयासं इयतीं सम्पत्तिं विधाय कृतस्य कर्मणः फलम् अदृष्टाय कस्मैचित् परमेश्वराभिधाय समर्पणे का वा युक्तिः? तेन कर्तुः को वा भवति लाभः! अर्थव्ययः शरीरकार्श्य, समयव्यक्तीभाव एव अवशिशिष्यत इति च कदाचित् वा मनसि विमन्थानो यजमानो विचारणां कर्तुमारभते। तादृशपरिपक्वमनाः गुरूपदेशं लब्ध्वा परवस्तु ज्ञानेप्सुः कृतार्थोपि भवेत्। इत्थं परमेश्वरार्पणमस्त्विति वाक्ये ध्वनिः यजमानं तत्त्वावगमने प्रचोदयति। एवमेव कर्मण्यस्य यजमानस्य तत्त्वबोधकारकान् प्रसङ्गान् अन्वेष्टुं तदुपबृंहनाय चोपक्रम्यते अयं प्रबन्धः।

**सर्वगतब्रह्मदर्शनाभ्यासः**

चैतन्यहीनं वस्तु नास्ति जगत्यामिति। ब्रह्मणः संस्थानान्तरमेवेदं जगदिति राद्धान्तः। परिदृश्यमाणमश्मादिकं, वृद्धिमदप्यचलं वृक्षादिकं चैतन्यवदिति न विश्वसन्ति जनाः। उपनिषद्ग्रन्थेषु ब्रह्मलक्षणनिरूपणे भूतभौतिकसृष्टयः तल्लक्षणं च प्रपञ्चितं वर्तते। किन्तु आरम्भदशायां मानवकाः यज्वानः सर्वं चैतन्यवदिति वाक्यश्रवणादनन्तरमपि न विजानीयुः। अर्थात् अनुभवविहीनाः न प्रतीयासुः। अव्यक्तं दुर्ग्राह्यं ब्रह्मलक्षमवगन्तुं सूक्ष्मेक्षिका मतिः शास्त्राभ्यासः परिणतायां मतौ स्वानुभवपूर्वकं वस्तुस्थितिं विजानाति जनोयम्। यावत् तत्त्वज्ञानसम्पत्तिः तावत् पर्यन्तं प्रतिवस्तुनि परब्रह्मचैतन्यदर्शनमभ्यासयितुं कर्मकाण्डे बहूनि विधानानि प्रोक्तानि। आधुनिकविज्ञान शास्त्रवेत्तारश्च बहुश्रमं कृत्वा औपनिषदसिद्धान्तप्रबोधिताः एव अनुगतं चैतन्यमिति प्रत्यभ्यजानन्। एवञ्च जगदीशचन्द्रवसुनामको भारतीयशास्त्रेच्छकः वृक्षः सजीव इति निरूप्य समस्ते लोके प्रख्यातुं समाप। एवं परिशोध्य सर्वगतचैतन्यसत्त्वं समभिज्ञातवन्तोप्याधुनिकवैज्ञानिकाः तदनुयायिनो जनाश्च ब्रह्मरूपे जगति पृथिवी-जल-वाय्वादिषु तद्रचितजीवगणे च सम्मानमवलम्बनीयमिति कार्याकार्यविवेचन मुग्धाः प्रवर्तन्ते। कार्याकार्यज्ञानिनोपि लोभापहृतविवेकाः स्वल्पकालिकसुखप्रणयिनः नैसर्गिकधातुसस्यवृक्षप्राणिसम्पद्विनाशायोद्यच्छन्ति। शतसहस्रादिषु अस्मत् पूर्वजैः परिपालिता संरक्षिता भू-वायु-जलादिसम्पत्तिः आधुनिकविज्ञानाविष्कृतसुखजीवनलालसैः अस्मदादिभिः द्विशतवत्सराभ्यन्तरे विनाशदिशं प्रस्थापित इति महतो निषादस्य स्थानम्।

परन्तु पूर्वकाले वैदिककर्मसु श्रद्धधाना अनुष्ठातारो यज्वनः अध्येतारश्च आचार्यसकाशात् बाल्यादेव सर्ववस्तुगतचैतन्यावगमनं प्रशिक्षन्ते स्म। तादृशं सदाचारं, तद्वारा परवस्तुज्ञानञ्च शिक्षयति वैदिककर्मकाण्डः। वैदिकाख्यानेषु “[3]ब्रह्म वै पर्णः” “ ब्रह्म वै चतुर्होतारः” इत्यादिना सर्वगतब्रह्मप्रसिद्धिरभिव्यज्यते। यथा नानावेषालङ्कृतं शैलूषं तत्सम्बन्धी सर्वेष्वाकारेष्वभिजानाति। तथैव वैदिककर्मसम्प्रदायपटुना यज्वनापि सर्वगतं ब्रह्म प्रत्यभिज्ञायते। वैदिककर्मतत्त्वबुभुक्षया तत्प्रकाराणि विविच्य तद्गततत्त्वबोधप्रसङ्गाश्च वेत्स्यामः

**विहितकर्माचरणं - तत्त्वबोधः**

**विहितस्याननुष्ठानात् निषिद्धस्य च सेवनात्।**
**अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति।**

चत्वारो आश्रमाः सनातनधार्मिकपरम्परया भवन्ति। तत्र आश्रमिषु गृहस्थ एव अन्येषामाश्रमिणाम् आधारभूत इति, तस्य

[3] तै.ब्रा.3-2-1

धर्माधिकतराः वेदेनोपदिष्टाः। निजदारापोषणाय गृहकल्पनाय – वृद्धजनसंरक्षणाय - बुधजनसेवनाय – यतिभिक्षुब्रह्मचर्यादीना मभ्यवहारप्रदानाय - स्वस्य सुखजीवनादिभ्यश्च नित्यं प्रयतते गृहस्थः। एवं गृहस्थस्य व्यवहारः, स्वस्य, स्वीयानां, परेषां कृते सदाधर्मोपेतो वर्तते। गृहस्थस्य जीवने वह्निसाध्यान्येव कर्माणि बहूनि विद्यन्ते। गृहस्थस्य अग्निमत्ता उपनयनप्रभृति अन्त्येष्टिपर्यन्तं विहिता भवति। "[4]अयमग्निर्गृहपतिः" इति मन्त्रोक्तदिशा गृहस्थस्य निवासस्याधिपत्यम् अग्नेरेव भवेत्। अतो अस्याग्नेर्नाम गृहपतिरिति। एवं व्यवस्थितो वर्तमानस्य यज्वनः गृहस्थस्य तत्परिवारस्य च देवतासान्निध्यम् अनुक्षणं स्मार्यते। तस्य निवासः परितः पर्यावरणं च परिशुद्धं पवित्रितं वर्तेत। एतादृश प्रयतनिवेशे वसतां जनानां मनांसि साधारण्येन परहिंसाविमुखानि परद्रव्येष्वलभ्यन्ति। परोपकारितामूलकदैवानुग्रहसम्पादनेच्छूनि च भवन्ति तच्छेतांसि। अपि च गृहपतेरग्निर्देवः स्यात् संनिधानाद्यजमानः सभद्रतामियात्। एवं चिरमनुष्ठाय नित्यकर्माणि निष्पिष्टदुरितत्त्वात् परिशुद्धमनाः यजमानः ब्रह्मण्यत्त्वमप्यधि गच्छेदिति अग्निमत्ता प्रकरणेनावगम्यते।

### अन्येषां भागो नापेक्षणीयः स्वस्य कृते आधिक्येनोत्पत्तिरेव वाञ्छेत्।

"आत्मना सर्वभूतानि समं सम्भावयेद्बुधः" एषा सज्जनानां जीवनशैली। तां बोधयन् समेषु वृक्षजन्तुजीवेषु ब्रह्मसत्यं ज्ञापयति श्रुतिः। श्वो यक्ष्यमाणदर्शेष्टिगतइन्द्रदेवताकदधिपयो-यागाय गावो दोग्धव्याः। तदर्थं प्रातर्दोहनानन्तरं वत्सानां मातृक्षीरपानानन्तरं तान् वत्सान् दूरे अपाकुर्यात्। ततः अभिमन्त्रणरूप गोप्रार्थनां कुर्याद्यजमानः। हे गावः एतद्दिनपर्यन्तं युष्मत् क्षीरे तृतीयो भाग इष्यते। तस्मात् "[5]आप्ययध्वमग्न्यादेवभागम्" सायंदोहसमये प्रभूतक्षीरप्रदानाय, प्रकामं घासादिकं भवतीभिः खादितव्यमति अत्र तत्त्वबोधः सृष्टौ सर्वस्य जीवस्य प्राणनाय परतो जीवांशोपेक्षितः उपजीव्य-उपजीवकसम्बन्धो सर्वत्र दृश्यते विश्वस्मिन्। स्वस्य जीवसन्धारणाय अन्येषां जीवांशमुपयुज्य जिजीविशति प्राणिजातम्। व्याघ्रादयो अजादीन् भक्षियित्वा जीवन्ति। अजादयः पादपान् तत्पर्णादिकमदन्ति। मनुष्यादि द्विपादः प्राणरक्षणाय अन्यान् चतुष्पदौ वा खादन्ति। अथवा वृक्ष-शाखौषधिफलमूलादिकम् अभ्यवहन्ति। पादपादिकमपि जल-वायु-पृथिवि-तेजोगतजीवांशग्रहणेन जीवति।

[4] ए.का.1-8-4

[5] तै.सं.1-1-1

जगति क्वचित् जीवांशाः जीवहीनाभासकानि वर्तन्ते। यथा बीजादिषु स्तब्धा जीवशक्तिः सहकारिकारणविरोहान्तर्हितासती पश्यतां जनानां निर्जीवभ्रान्तिमुत्पादयति। अश्मस्थाण्वादिषु अणुगतं चैतन्यं चर्मचक्षुषामगोचरमपि अनुमानेन सूक्ष्मपरिकरसाहाय्येन निश्चेतुं शक्यते। एवं जगत्सर्वं सजीवं ज्ञेयम्। एवञ्च विधात्रा सृष्टानां प्राणिनां सर्वेषामपि जीवने वर्ततेऽधिकारः। अर्थात् आहारेपि सर्वेषाम् अधिकारो वर्तत इति निःसन्दिग्धम्। मनुष्यादि जातयः स्वस्य जीवनाय परतो जीवांशान् अलमनुभूयाप्यसन्तृप्ताः लोभात् प्रभूतं सञ्चेतुमिच्छन्ति। एवं सञ्चयनेन तस्मिन्नेव आहारे परेषां जीविनां भगवता प्रदत्तस्समानावकाशो नश्यति। केषाञ्चित् प्राणिनां स्वार्थैकमनःप्रवृत्तेः इतरे प्राणिनः क्षुभ्यन्तो दृश्यन्ते।

अतः यद्यदाहारः स्वस्य प्रत्यहं प्राणधारणाय लभ्यते तद्भोजनावसरे सञ्चिन्तयेदेवम्। हे भगवन् मम जीवसन्धारणाय आहारं समपादयम्। अस्मिन् सम्पादने अन्येषामपि प्राणिनां वर्तमानमधिकारं यद्यपि निराचिकीर्षामि। मदीयप्राणशक्त्या प्यायनाय त्वयैव प्रदत्तं तुभ्यं समर्प्य एतदाहारं स्वीचिकीर्षामि। एतां धियम् अभिवर्धयत्येतत् प्रकरणम्। उपलभ्यमानभागादधिको भागो यदीष्यते तर्हि वर्तमानभागिनः भागहरणचिन्तनं विहाय अधिकं भागमस्मभ्यमुत्पाद्यतामिति प्रार्थना विनीतेन क्रियेति च प्रबोधयति।

एवमेव "[6]नारुद्रोरुद्रमर्चयेदिति" याज्ञिकोक्तिः यां देवतां आरिराधायिषत, तदीयं मन्त्रं, तदीयाकृतिमात्मनि सम्भावयेदिति उपासना सम्प्रदायः। अत एव मन्त्राङ्गानि स्वीयङ्गेषु अङ्गन्यास-करन्यासद्वारा संयोज्य, मनश्च देवतायां प्रलीय, देवैकत्वमापद्येत पूजकः इति न्यासस्यान्तरार्थः।

अत एव वैदिककर्मसु बहुशः आधान-निर्वाप-प्रदानादिसन्दर्भेषु एवम् अभिव्यज्यते। "[7]देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे" इति योयं मम बुद्धिं प्रचोदयत्यन्तरस्थः सवित्रभिधानः परमात्मा, तेन प्रचोदितोहं तस्य प्रेरणे देवाध्वर्युभूतयोः अश्विदेवतयोर्बाहुभ्यां, पूष्णो देवस्य हस्ताभ्यामिदं कर्म करोमि। मम शरीरे तास्ता देवता उपस्थिताः। देव एव स्वकीयं कर्मैतच्छरीरद्वारा करोति। एतच्छरीरं प्रयोज्यकर्त्रैव। प्रयोजको देव एव। अहं तावन्निमित्तमात्रः साक्षिभूतोस्मि इति कर्तृत्व-भोक्तृत्वभावनां त्याजयति कर्मोपदेशः। एवं यज्वा दर्भक्षेत्रं गत्वा "[8]देवानां परिषूतमसि वर्षवृद्धमसि" इति स्तोत्रमभिदत्ते।

[6] बो.गृ.सू.16-2

[7] तै.सं.1-3-1

[8] तै.सं.1-1-2

"[9]इदं देवानाम्" इति क्षेत्रे यावदलं दर्भाः क्रत्वर्थमपेक्षिताः तावन्तं प्रदेशं दैविकं प्रज्ञाय, अवशिष्टभागम् इदं पशूनामिति विभजति। लोके सामान्यतः तृणप्रायः इत्युक्तौ अल्पीभावः सूच्यते। कुतोयम् अल्पीभावः? प्रकाममुपलब्धावधीरणा-लोकप्रकृतिः। एवं तृणं नीचैस्तरां लघीयस्त्वेन मन्वाने लोकेस्मिन् यः कश्चनापि वर्तेत वा नरः तृणकाण्डदीन् सम्भावयित। लौकिकदृष्ट्या उन्नतस्थानापन्नान् प्रकृष्टत्वेन विस्रुतान् – राज्ञो, विदुषः कनकं रत्नादिकं संमानयति सर्वोपि। किन्तु "जीवो ब्रह्मैव नापरः" इति सिद्धान्तस्य अनुष्ठापनदिशायां यजमानं प्रक्रामयति "वैदिककर्मकाण्डः" इति वक्तव्यस्य दृष्टान्तभूतमेतत् प्रकरणम्।

## उपसंहार

एवं सर्वत्र वैदिककर्मसु ग्रहप्रसङ्गः, प्रवर्ग्यक्रतुविचारः उपसत्, सौमिकविचारः, सोमविक्रेतृव्यवहारः, ब्रह्ममेधः, पैतृककर्मादि सहस्राधिकप्रकरणानि एकैकशः कर्माङ्गोपदेशने तत्त्वमुपदिशन्ति, साधुजीवनोत्कर्षतामावेद्य, धर्मसम्मतिमार्गे प्रयोज्य क्रमेण तस्यान्तःकरणं परिशोधयन्ति। इत्थं वैदिककर्मान्तर्गतं तत्त्वबोधमभिगच्छन् विद्वान्, यथाशक्ति वेदविहितकर्माण्याचर्य सर्वगतब्रह्मदर्शनमसकृदभ्यस्य, शुद्धान्तःकरणाः साधनचतुष्टय सम्पत्तिमाप्य संसारचक्रात् निवर्तितुकामो भवति। ततो गेही गार्हस्थ्यात् अग्रिममाश्रमं जिगमिषुः, अनन्तरकाले वानप्रस्था श्रमोद्युक्तो वा प्रव्रजिष्यन् वा ब्रह्मात्मानुभावायोद्यतते। एवञ्च वैदिककर्माचरणं, तदन्तर्गततत्त्वबोधश्च परम्परया परमार्थसाधक त्वात् पुंसां बहुलमुपकुरुते।

## सङ्केताक्षरसूची

1. तै.सं – तैत्तिरीयसंहिता, संपादकः-नारायण आप्टे,प्रकाशकः- आनन्द आश्रम, पुणे,1920
2. तै.ब्रा – तैत्तिरीयब्राह्मणम्, संपादकः-नारायण आप्टे,प्रकाशकः- आनन्द आश्रम, पुणे, 1920
3. ए.का – एकाग्निकाण्डः, संपादकः एस् सुदर्शन शर्मा, श्रीवेङ्कटेश्वर वेदविश्वविद्यालयः, तिरुपति,2009
4. बोधा.गृ – बोधायनगृह्यसूत्रम्, संपादकः-आर्, शाम शास्त्री, सर्वकारीय प्राच्य लाइब्रेरी, मैसूर, 1920

[9] तै.सं.1-1-6